N. [illegible].

Shuklayajajurvediya rudrastha-
शुक्लयजुर्वेदीय रुद्राष्टाध्यायी dhyayee

Sanskrit

Printed on paper

1925 San

Folio: 55

7.4" x 4.2"

Complete

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ शुक्लयजुर्वेदीयरुद्राष्टाध्यायीप्रारंभः ॥

154
A

किंमत ०-६-०

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY.
Jangamwadi Math, VARANASI,
Acc. No. ....

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्री जगद्गुरु विश्वाराध्य जंगमवाडी मठ काशी
ज्ञानसिंहासन

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

॥ श्रीगणेशायनमः ॥ अथ श्रीमद्रुद्राऽभिषेकप्रयोगः॥आचम्य प्रा-
णानायम्य शान्तिसूक्तं पठित्वा सुमुखश्चेत्यादिगणपतिस्मरणं कृत्वा
संकल्पः—अद्येत्यादि० एवंगुणविशेषणविशिष्टायां शुभपुण्यतिथौ म-
माऽऽत्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं धर्मार्थकाममोक्षसिद्धि-
द्वारा सर्वव्याधिनिरासपूर्वकं सर्वाभीष्टसिद्ध्यर्थं ॐ भूर्भुवःस्वः श्री-
भवानीशङ्करमहारुद्रदेवताप्रीत्यर्थं यथाज्ञानेन यथामिलितोपचारद्र-
व्यैः षडङ्गन्यासपूर्वकं पुरुषसूक्तेन ध्यानाऽवाहनादिषोडशोपचारैः
अन्योपचारैश्च सकृद्रुद्रावर्तनेनाभिषेक [रुद्रं महारुद्रमतिरुद्रं वा]
पूर्वकपूजनमहं करिष्ये॥षडङ्गन्यासाः—मनोजूतिरिति मन्त्रस्य बृह-
स्पतिर्ऋषिः बृहतीछन्दःबृहस्पतिर्देवता हृदयन्यासे जपे विनियो-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रुद्रा०

॥१॥ गः॥ ॐमनोजूतिर्जुषतामाज्यंस्यबृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टंय्य ज्ञंसमिमन्दधातु॥ विश्वेदेवासइहमादयन्तामो३म्प्रतिष्ठ ॥ ॐहृद याय नमः ॥१॥ अबोद्धयग्निरिति मंत्रस्य बुधगविष्ठिरा ऋषिः त्रिष्टु प्छन्दः अग्निर्देवता शिरोन्यासे जपे विनियोगः ॥ ॐ अबोद्धय ग्निःसमिधाजनानाम्प्रतिधेनुमिवायतीमुषासम् ॥ यह्वाइवप्प्रवयामु ज्जिहानाःप्प्रभानवःसिस्रतेनाकमच्छ ॥ ॐशिरसे स्वाहा ॥ २ ॥ मूर्द्धानमिति मन्त्रस्य भरद्वाजऋषिः त्रिष्टुप्छन्दः अग्निर्देवता शिखा न्यासे जपे विनियोगः॥ ॐमूर्द्धानन्दिवोअरतिम्पृथिव्यावैश्वानर मृतआजातमग्निम् ॥ कविंसम्म्राजमतिथिञ्जनानामासन्नापात्रञ्ज नयन्तदेवाः॥ॐशिखायै वषट् ॥३॥ मर्म्माणित इति मन्त्रस्य अप्र

प्रयोगः

॥१॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तिरथऋषिः विराट्छन्दः मर्म्माणि देवता कवचन्यासे जपे विनि-
योगः ॥ ॐ मर्माणितेव्वर्म्मणाच्छादयामिसोमंस्त्वाराजामृतेनानुंव-
स्ताम् ॥ उरोर्व्वरीयोव्वरुणस्तेकृणोतुजयन्तन्त्वानुंदेवामंदन्तु ॥ ॐक-
वचाय हुम् ॥ ४ ॥ विश्वतश्चक्षुरिति मन्त्रस्य विश्वकर्माभौवनऋषिः
त्रिष्टुप्छन्दःविश्वकर्मा देवता नेत्रन्यासे जपे विनियोगः॥ॐव्विश्श्व-
तश्चक्षुरुतव्विश्श्वतोमुखोव्विश्श्वतोबाहुरुतव्विश्श्वतस्पात् ॥सम्ब्बा-
हुभ्यान्धमंतिसम्पतत्रैर्द्यावाभूमींजनयन्देवऽएकः ॥ ॐनेत्रत्रयाय
वौषट् ॥५॥मानस्तोक इति मन्त्रस्य परमेष्ठी ऋषिः जगतीछन्दः एक
रुद्रो देवता अस्त्रन्यासे जपे विनियोगः ॥ ॐमानस्तोकेतनंयेमानऽ-
आयुंषिमानोगोषुमानोऽअश्श्वेषुरीरिषः ॥ मानोव्वीरान्नुंद्रभामिनोव्व

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

धीर्हविष्मन्तꣳसदमित्त्वाहवामहे ॥ ॐअस्त्राय फट् ॥६॥ इति न्या-
सान्कृत्वा कलशपूजनम्—कलशस्य मुखे विष्णुः० इति कलशमावा
ह्य तस्मिन्वरुणावाहनम्—ॐतत्त्वायामिब्रह्मणाव्वन्दमानस्तदाशा-
स्तेयजमानोहविर्भिः । अहेडमानोवरुणेहबोध्युरुशꣳसमानऽआ-
युꣳप्रमोषीꣳ॥अस्मिन्कलशे वरुणमावाहयामि ॥कलशप्रार्थना—दे-
वदानवसंवादे०इति संप्रार्थ्य ॐभूर्भुवःस्वःकलशस्थवरुणाय नमः
आवाहयामि सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि नमस्क-
रोमि ॥ ततः कलशोदकेन पूजाद्रव्याणि तथात्मानं च अपवित्रः०
इति मंत्रेण संप्रोक्ष्य कलशमुद्रां प्रदर्श्य शङ्खपूजनम्—ॐ अग्निर्ऋषिꣳ
पवमानꣳपाञ्चजन्यꣳपुरोहितꣳ । तमीमहेमहागयम् ॥ ॐभूर्भुवःस्वः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शङ्खस्थदेवतायै नमः आवाहयामि सर्वोपचारार्थे गन्धपुष्पाणि समर्पयामि नमस्करोमि ॥ शङ्खमुद्रां प्रदर्श्य घण्टापूजनम्—ॐ सुपर्णोसि गरुत्मॉंस्त्रिवृत्तेशिरोगायत्रञ्चक्षुर्बृहद्रथन्तरेपक्षौ । स्तोमऽआत्मा छन्दाᳬंस्यङ्गानियजूᳬंषिनाम । सामतेतनूर्व्वामदेव्व्यंय्यज्ञायज्ञियम्पुच्छन्धिष्ण्याᳬंःशफाः । सुपर्णोसिगरुत्मान्दिवङ्गच्छस्वः पत ॥ ॐ भूर्भुवःस्वः घण्टास्थाय गरुडाय नमः आवाहयामि सर्वोपचारार्थे गन्धपुष्पाणि समर्पयामि नमस्करोमि ॥ घण्टामुद्रां प्रदर्श्य दीपपूजनम्—ॐ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्य्योज्योतिर्ज्योतिःसूर्य्यःस्वाहा । अग्निर्वर्च्चोज्योतिर्वर्च्चःस्वाहा सूर्य्योवर्च्चोज्योतिर्वर्च्चःस्वाहा । ज्योतिःसूर्य्यःसूर्य्योज्योतिःस्वाहा ॥ ॐ भूर्भुवः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्वः दीपस्थदेवतायै नमः आवाहयामि सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि नमस्करोमि ॥ शिवध्यानम्—ॐ नमस्तेरुद्रमन्न्यवऽउतोतऽइषवेनमः। बाहुब्भ्यामुततेनमः ॥ आवाहनम्—ॐ सहस्त्रशीर्षा० ॐ भूर्भुवःस्वः श्रीभवानीशङ्करदेवताभ्यो नमः आवाहनं समर्पयामि ॥ आसनम्—ॐ पुरुषऽएवे० ॐ भू० श्री० नमः आसनं सम० ॥ पाद्यम्—ॐ एतावानस्य० ॐ भू० श्री० नमः पाद्यं सम० ॥ अर्घ्यम्—त्रिपादूर्ध्वं० ॐ भू० श्री० नमः अर्घ्यं सम० ॥ आचमनम्—ॐ ततोविराडं० ॐ भू० श्री० नमःआचमनीयं सम० ॥ स्नानम्—ॐ तस्माद्यज्ञा० ॐ भू० श्री० नमः स्नानं सम० ॥ पंचामृतस्नानम्—ॐ पञ्चनद्यः सरस्वतीमपियन्तिसस्रोतसः। सरस्वतीतुपञ्चधासोदेशे भवत्स-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रित्॥ॐभू०श्री० नमःपञ्चामृतस्नानं सम०॥गन्धोदकस्नानम्—ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥ ॐभू०श्री०नमःगन्धोदकस्नानं सम० ॥ उद्वर्तनस्नानम् ॐ अꣳशुनातेअꣳशुः पृच्यतांपरुषापरुः। गन्धस्तेसोममवतुमदायरसोऽअच्युतः॥ॐभू०श्री०नमः उद्वर्तनस्नानं सम०॥ तदन्ते शुद्धोदकस्नानं आचमनीयं च सम०॥पञ्चामृतादिस्नानाङ्गपूजा—ॐभू० श्री० नमः वस्त्रोपवस्त्रार्थे यज्ञोपवीतार्थे च अक्षतान्सम० ॥ गन्धं नानापरिमलसौभाग्यद्रव्याणि ऋतुकालोद्भवपुष्पाणि बिल्वपत्राणि च सम०॥धूपमाघ्रापयामि ॥ दीपं दर्शयामि ॥ शर्करोपहारनैवेद्यं हस्तप्रक्षालनं मुखप्रक्षालनं करोद्वर्तनार्थे चन्दनं मुखवा-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सार्थं पूगीफलताम्बूलं हिरण्यमुद्रादक्षिणां कर्पूरारार्तिक्यं प्रदक्षिणां मंत्रपुष्पयुक्तनमस्कारं विशेषार्घ्यं प्रार्थनां च सम०॥अर्पणम्-अनेन पञ्चामृतादिस्नानाङ्गपूजनकृतेन श्रीभवानीशङ्करदेवताःप्रीयन्तां न मम॥निर्माल्यं विसृज्य पुनश्च गन्धाक्षतपुष्पाणि समर्प्य (रुद्रमन्त्रैः) जलधारया अभिषेकः कार्यः ॥ अभिषेकविचारः—" वेदं[४]वेदां[४]ऽब्धिं[४]-शरां[३]श्च शरां[३]शरां[३]द्वि[२]कै[१]कं[१]कम् । द्वौ[२] द्वौ[२] पृथग्भिर्मंत्रैस्तु नमकाश्चमकाः स्मृताः ॥ वाजं[१]श्च सत्यं[२]मुकं[३]चाश्मां[४]चाग्निरं[५]शुं[६]ष् तथाग्निकः । एकां[७]चैव चतस्रं[१]श्च त्र्यं[१]विर्वाजां[१] इति क्रमः ॥ " एवं चमकानेकादशधा विभज्य एकैकभागं नमकेषु संयोज्य पठेत्स "रुद्रः" ॥ तैरेकादशरुद्रैः "लघुरुद्रः" ॥ तैरेकादशगुणैः "महारुद्रः"॥तैरेकादशावृत्तैः " अतिरुद्रः" ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नꣳ शिवसंङ्कल्पमस्तु ॥ १० ॥ इति रुद्रे प्रथमोऽध्यायः ॥ १ ॥

हरिः ॐ ॥ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ॥ स भूमिꣳ सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥ पुरुष एवेदꣳ सर्वंय्यद्भूतंय्यच्च भाव्यम् ॥ उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ २ ॥ एतावानस्य महिमातो ज्ज्याया

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रु० याँश्चपूरुषः ॥ पादोस्यविश्वाभूतानित्रिपाद अ० २
॥७॥ स्यामृतन्दिवि ॥ ३ ॥ त्रिपादूर्ध्वऽउदैत्पुरुषः
पादोस्येहाभवत्पुनः ॥ ततोविष्वङ्व्यक्रा
मत्साशनानशनेऽअभि ॥४॥ ततोविराडजा
यतविराजोऽअधिपूरुषः ॥ सजातोऽअत्यरि
च्यतपश्चाद्भूमिमथोपुरः ॥ ५ ॥ तस्माद्यज्ञा ॥७॥
त्सर्वहुतःसम्भृतम्पृषदाज्यम् ॥ पशूँस्ताँ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्चंक्क्रेवायव्व्यानारण्याग्ग्राम्म्याश्चये ॥६॥ त
स्माद्यज्ञात्सर्व्वहुतऽऋचꣳसामानिजज्ञिरे ॥
छन्दाꣳसिजज्ञिरेतस्माद्यजुस्तस्म्मादजाय
त ॥ ७ ॥ तस्म्मादश्वाऽअजायन्तयेकेचोभ
यादतꣳ ॥ गावोहजज्ञिरेतस्मात्तस्माज्जाताऽ
अजावयः ॥८॥ तंय्यज्ञम्बर्हिषिप्प्रौक्षन्पुरु
षञ्जातमग्ग्रतः ॥ तेनदेवाऽअयजन्तसाद्ध्या

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रु० ऽऋषयश्चये ॥९॥ यत्पुरुषंव्यदधुः कतिधा अ० २
॥८॥ व्यकल्पयन्॥ मुखङ्किमस्यासीत्किम्बाहूकि
मूरूपादाऽउच्च्येते ॥१०॥ ब्राह्मणोस्यमुख
मासीद्बाहूराजन्यः कृतः ॥ऊरूतदस्ययद्वै
श्यः पद्भ्याᳮशूद्रोऽअजायत॥११॥चन्द्रमा
मनसोजातश्चक्षोःसूर्य्योऽअजायत॥ श्रोत्त्रा ॥८॥
द्वायुश्चप्राणश्चमुखादग्निरजायत ॥१२॥ ना

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भ्याऽआसीदन्तरिक्षꣳशीर्ष्णोद्यौःसमवर्त्त
त। पद्भ्याम्भूमिर्द्दिशःश्रोत्रात्तथालोकाँ२ऽअ
कल्पयन् ॥१३॥ यत्पुरुषेणहविषादेवायज्ञ
मतन्वत ॥ वसन्तोऽस्यासीदाज्यङ्ग्रीष्मऽइ
ध्मःशरद्धविः ॥ १४ ॥ सप्तास्यासन्परिध
यस्त्रिःसप्तसमिधः कृताः ॥ देवायद्यज्ञन्त
न्वानाऽअबध्नन्पुरुषम्पशुम् ॥१५॥ यज्ञेनय

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

॥१॥ ज्ञमयजन्तदेवास्तानिधर्म्माणिप्प्रथमान्यासन् ॥ तेहुनाकंम्महिमानंः सचन्तयत्रपूर्वे
साध्याः सन्तिदेवाः ।१६। अद्भ्यः सम्भृतः
पृथिव्यैरसाच्चविश्वकर्म्मणः समवर्त्तताग्ग्रे॥
तस्यत्त्वष्टाविदधंद्रूपमेतितन्मर्त्यस्यदेवत्व
माजानमग्ग्रे ।।१७।। वेदाहमेतम्पुरुषम्महा ॥१॥
न्तमादित्यवर्णन्तमसः परस्तात् ॥ तमेवाविं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दित्त्वातिमृत्युमेतिनान्यःपन्थाविद्यतेयंना
य॥१८॥ प्प्रजापतिश्चरतिगर्ब्भेऽअन्तरजाय
मानोबहुधाविजायते ॥ तस्ययोनिम्परिपश्य
न्तिधीरास्तस्मिन्हतस्थुर्ब्भुवनानिविश्वा
॥१९॥ योदेवेब्भ्यऽआतपतियोदेवानाम्पुरो
हितः॥ पूर्वोयोदेवेब्भ्योजातोनमोरुचायब्ब्रा
ह्मये ॥२०॥ रुचम्ब्राह्मञ्जनयन्तोदेवाऽअग्ग्रे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तंदंब्रुवन्॥ यस्त्वैवम्ब्राह्मणोविद्यात्तस्यंदेवा
॥१०॥ ऽअसन्वशे॥२१॥श्रीश्चंतेलक्ष्मीश्चपत्न्यांव
होरात्रेपार्श्वेनक्षंत्राणिरूपमश्विनौव्यात्तम्॥
इष्णन्निषाणामुम्मंऽइषाणसर्वंलोकम्मंऽइ
षाण॥२२॥इति रुद्रे द्वितीयोऽध्यायः॥२॥
हरिः ॐ॥ आशुःशिशांनोवृषभोनभीमोघं ॥१०॥
नाघनःक्षोभंणश्चर्षणीनाम्॥ सङ्क्रन्दंनोनि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मिषऽएकवीरःशतꣳसेनाऽअजयत्साकमि
न्द्रः॥१॥सङ्क्रन्दनेनानिमिषेणजिष्णुना
युत्कारेणदुश्च्यवनेनधृष्णुना॥ तदिन्द्रेणजय
तत्सहध्वंयुधोनरऽइषुहस्तेनवृष्णा॥२॥
सऽइषुहस्तैःसनिषङ्गिभिर्वशीसꣳस्रष्टासयु
धऽइन्द्रोगणेन॥सꣳसृष्टजित्सोमपाबाहुशर्द्ध्यु
ग्रधन्वाप्रतिहिताभिरस्ता॥३॥बृहस्पतेप

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रु० रिंदीयारथेनरक्षोहामित्राँ२ऽअपबाधमानः ॥ अ० ३
॥११॥ प्प्रभञ्जन्त्सेनाᳪत्प्रमृणोयुधाजयन्नस्म्माकमे
द्ध्यविता रथानाम् ॥४॥ बलविज्ञायस्त्थवि
रᳪप्प्रवीरᳪसहस्वान्वाजीसहमानऽउग्ग्रः ॥
अभिवीरोऽअभिसत्त्वासहोजाजैत्रमिन्द्ररथ
मातिष्ठगोवित् ॥५॥ गोत्त्रभिदङ्गोविदंवज्ज्र ॥११॥
बाहुञ्जयन्तमज्ज्मप्प्रमृणन्तमोजसा ॥ इमᳪ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

संजाताऽअनुवीरयध्वमिन्द्रᳫं सखायोऽअनु
सᳫंरभध्वम् ।६। अभिगोत्राणिसहसागाहमा
नोदयोवीरःशतमन्युरिन्द्रः। दुश्च्यवनःपृत
नाषाडयुद्ध्योऽस्म्माकᳫंसेनाऽअवतुप्प्रयुत्सु
॥ ७ ॥ इन्द्रऽआसान्नेताबृहस्प्पतिर्द्दक्षिणाय
ज्ञःपुरऽएतुसोमः॥ देवसेनानामभिभञ्जती
नाञ्जयन्तीनाम्मरुतोयन्त्वग्ग्रम् ॥८॥ इन्द्र

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

 स्यवृष्णोवरुणस्यराज्ञऽआदित्यानाम्मरु
॥१२॥ ताᳬंशर्द्धऽउग्रम्॥महामनसाम्भुवनच्यवा
नाङ्घोषोदेवानाञ्जयतामुदस्थात् ।९। उद्धर्ष
यमघवन्नायुधान्युत्सत्त्वनाम्मामकानाम्म
नाᳬंसि॥ उद्वृत्रहन्वाजिनांवाजिनान्युद्रथा
नाञ्जयतांयन्तुघोषाᳬ॥ १० ॥ अस्माकमि ॥१२॥
न्द्रᳬंसमृतेषुध्वजेष्ष्वस्म्माकंय्याऽइषवस्ता

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

जयन्तु ॥ अस्माकंवीराऽउत्तरेभवन्त्वस्माँ२
ऽउंदेवाऽअवताहवेषु ॥ ११ ॥ अमीषांश्चित्तम्प्र
तिलोभयन्तीगृहाणाङ्गान्यप्प्वेपरेहि ॥ अभि
प्प्रेहिनिर्द्दहहृत्सुशोकैरन्धेनामित्रास्तमसा
सचन्ताम् ॥ १२ ॥ अवसृष्टापरापतशरव्येब्र
ह्मसꣳशिते ॥ गच्छामित्रान्प्रपद्यस्वमामीषा
ङ्कञ्चनोच्छिषः ॥ १३ ॥ प्रेताजयतानरऽइन्द्रो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वृहच्छर्म्मयच्छतु ॥ उग्ग्रावःसन्तुबाहवोना
॥१३॥ धृष्ष्यायथासथ॥१४॥ असौयासेनामरुतः
परेषामभ्यैतिनऽओजसास्पर्द्धमाना ॥ ता
ङ्गूहततमसापव्रतेनयथामीऽअन्योऽअन्यन्न
जानन् ॥१५॥ यत्रबाणाःसम्पतन्तिकुमारा
विशिखाऽइव॥ तन्नऽइन्द्रोबृहस्पतिरदितिः ॥१३॥
शर्म्मयच्छतुविश्श्वाहाशर्म्मयच्छतु ॥१६॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मर्म्माणितेवर्म्मणाच्छादयामिसोमस्त्वाराजामृतेनानुवस्ताम् ॥ उरोर्व्वरीयोव्वरुणस्तेकृणोतुजयन्तन्त्वानुदेवामदन्तु ॥ १७ ॥ इति रुद्रे तृतीयोऽध्यायः ॥ ३ ॥

हरिःॐ॥ विभ्भ्राड्बृहत्पिबतुसोम्म्यम्मध्वायुर्द्दधद्यज्ञपतावविह्रुतम् ॥ व्वातजूतोयोऽअभिरक्षतित्त्मनाप्प्रजाःपुपोषपुरुधाव्विराजति

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

॥ १ ॥ उदुत्त्यञ्जातवेदसन्देवंव्वहन्तिकेत
वः॥ दृशेव्विश्श्वायसूर्य्यम् ॥२॥ येनापावकच
क्षसाभुरण्यन्तञ्जनाँ२ऽअनु ॥ त्वंव्वरुणपश्यं
सि ॥३॥ दैव्यावद्ध्वर्य्यूऽआगतꣳरथेनसूर्य्य
त्वचा॥ मद्ध्वायज्ञꣳसमञ्जाथे॥ तम्प्रत्नथाऽयं
व्वेनश्चित्रन्देवानाम् ॥४॥ तम्प्रत्नथापूर्व्वथाव्वि
श्श्वथेमथाज्ज्येष्ठतातिम्बर्हिषदꣳस्वर्व्विदम् ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रतीचीनंवृजनंदोहसेधुनिमाशुअयंन्तमनु
यासुवर्द्धसे ॥ ५ ॥ अयंवेनश्चोदयत्पृश्निगर्भाज्ज्योतिर्ज्जरायूरजंसोविमाने ॥ इममपा
ᳪसंङ्गमेसूर्य्यस्यशिशुन्नविप्प्रांमतिभीरिह
न्ति॥६॥चित्रन्देवानामुदंगादनीकञ्चक्षुर्मित्त्रस्यवरुणस्याग्नेः ॥ आप्प्राद्यावापृथिवीऽ
अन्तरिक्षᳪसूर्य्यऽआत्मा जगतस्तस्थुषश्च

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

॥ ७ ॥ आनऽइडाभिर्विदथेसुशस्तिविश्वानं
॥१५॥ रःसविता देवऽएन्तु ॥ अपियथासवानोमत्स
थानोविश्वऽअगंदभिपित्वेमनीषा ॥८॥ यदद्य
कच्चवृत्रहन्नुदगाऽअभिसूर्य्य॥ सर्वन्तदिन्द्र
तेवशे ॥ ९ ॥ तरणिर्विश्वदर्शतोज्योतिष्कृद
सिसूर्य्य ॥ विश्वमाभासिरोचनम् ॥ १० ॥ ॥१५॥
तत्सूर्यस्यदेवत्वन्तन्महित्वम्मद्ध्याकर्त्तो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

र्वितंत॒ꣳसञ्जभार ॥ य॒देदयु॑क्तह॒रितः॑स॒ध
स्थादाद्रात्रीवास॑स्तनुतेसि॒मस्मै ॥ ११ ॥
तन्मि॒त्रस्य॒वरु॑णस्याभि॒चक्षे॒सूर्यो॑रू॒पङ्कृ॑णु
ते॒द्योरु॒पस्थे॑ ॥ अ॒नन्तम॒न्यद्रु॒श॑दस्य॒पाजः॑
कृ॒ष्णम॒न्यद्ध॒रितः॒सम्भ॑रन्ति ॥ १२ ॥ बण्म॒
हाँ२ऽअसिसूर्य॒बडा॑दित्यम॒हाँ२ऽअसि ॥ म॒ह
स्ते॑स॒तोम॑हि॒माप॑नस्यते॒द्धादे॑वम॒हाँ २ऽअसि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

३० ।१३। बट्सूर्य्यश्रवसामहाँ२ऽअसिसत्रादेव अ० ४
॥१६॥ महाँ२ऽअसि । मह्नादेवानामसुर्य्यःपुरोहि
तोविभुज्योतिरदाभ्यम् । १४। श्रायन्तऽइव
सूर्य्यंविश्वेदिन्द्रस्यभक्षत ॥ वसूनिजातेजन
मानऽओजसाप्रतिभागन्नदीधिम ॥१५॥ अ
द्यादेवाऽउदितासूर्य्यस्यनिरंहसःपिपृता ॥१६॥
निरवद्यात् ॥ तन्नोमित्रोवरुणोमामहन्तामदि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तिंसिन्धुः पृथिवीऽउतद्यौः ।१६। आकृष्णे
नरजंसावर्त्तमानोनिवेशयंन्नमृतम्मर्त्यंञ्च ॥
हिरण्ययेनसवितारथेनादेवोयांतिभुवनानिप
श्यन्॥१७॥ इति रुद्रे चतुर्थोऽध्यायः ॥४॥
हरिःॐ ॥ नमंस्तेरुद्रमन्यवंऽउतोतऽइषवेन
मंः ॥बाहुब्भ्यांमुततेनमंः ॥१॥यातेरुद्रशि
वातनूरघोरापांपकाशिनी ॥ तयांनस्तन्न्वाश

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रु० न्तंमयागिरिंशन्ताभिचाकशीहि ॥२॥ यामि अ० ५
॥१७॥ षुङ्गिरिशन्तहस्तेंबिभर्ष्यस्तवे ॥ शिवाङ्गिरि
त्रताङ्कुरुमाहिंꣳसीः पुरुषञ्जगत् ।३। शिवेनव
चंसात्वागिरिशाच्छावदामसि ॥ यथानःस
र्वमिज्जगदयक्ष्मꣳसुमनाऽअसत् ॥४॥ अध्य
वोचदधिवक्ताप्प्रथमोदैव्योभिषक् ॥ अहींश्च ॥१७॥
सर्वाञ्जम्भयन्त्सर्वाश्चयातुधान्योधराचीः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

परासुव ॥५॥ असौयस्ताम्म्रोऽअरुणऽउतब
ब्भ्रुःसुमङ्गलः॥ येचैनꣳरुद्राऽअभितोदिक्षु
श्रिताःसहस्रशोवैषाꣳहेडऽईमहे॥६॥असौ
योवसर्प्पतिनीलग्ग्रीवोविलोहितः॥उतैनङ्गो
पाऽअदृश्श्रन्नदृश्श्रन्नुदहार्य्यःसदृष्टोमृडया
तिनः॥७॥ नमोस्तुनीलग्ग्रीवायसहस्राक्षाय
मीढुषे॥ अथोयेऽअस्यसत्त्वानोहन्तेभ्योक

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रुन्नमं÷ ।८। प्रमुंञ्चधन्वंनस्त्वमुभयोरार्त्न्योँ
॥१८॥ ज्र्याम्॥ याश्चंतेहस्तऽइषंवःपराताभंगवोव
प ।९।।विज्यन्धनुं÷कपर्दिनोविशंल्ल्योबाणं
वाँ२उत॥ अनेशन्नस्ययाऽइषंवऽआभुरंस्यनि
षङ्गधिः॥१०॥यातेंहेतिर्म्मीढुंष्टमहस्तेंबभूवं
तेधनुं÷ ॥ तयास्म्मान्विश्वतस्त्वमंयक्ष्मयाप ॥१८॥
रिंभुज॥ ११ ॥ परिंतेधन्वंनोहेतिरस्मान्वृंण

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्कुविश्वतं÷॥ अथो॒यऽइषुधिस्तवा॒रेऽअस्मम
न्निधेहितम् ॥१२॥ अ॒वतत्य॒धनु॒ष्टूङ्सहस्राक्ष
शतेषुधे॥ नि॒शीर्य्यशल्या॒नाम्मु॒खाशि॒वोनः÷
सु॒मनाभव ।१३।नमंस्तु॒ऽआयु॑धायानाततायं
धृष्णवे । उ॒भाभ्यामु॒ततेनमोबा॒हुभ्या॒न्त
वधन्वने॥१४॥मानोम॒हान्तमु॒तमानोऽअर्भ॒
कम्मान॒ऽउक्षन्तमु॒तमानऽउक्षितम् ॥मानोव

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

धीः पितरम्मोतमातरम्मानः ÷ प्प्रियास्तन्न्वो
॥१९॥ रुद्द्ररीरिषः ।१५। मानस्तोकेतनयेमानऽआ
युषिमानोगोषुमानोऽअश्श्वेषुरीरिषः। मानोव्वी
रान्न्रुद्द्रभामिनोव्वधीर्हविष्म्मन्तः सदमित्त्वा
हवामहे ॥१६॥ नमोहिरण्ण्यबाहवेसेनान्न्येदि
शाञ्चपतयेनमोनमोव्वृक्षेब्भ्योहरिकेशेब्भ्यः ॥१९॥
पशूनाम्पतयेनमोनमः ÷ शष्प्पिञ्जरायत्त्विषी

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मतेपथीनाम्पतंयेनमोनमोहरिंकेशायोपवी
तिनेपुष्टानाम्पतंयेनमोनमोंबभ्लुशायं।१७।
नमोंबभ्लुशायं। व्याधिनेन्नांनाम्पतंयेनमोन
मोंभुवस्यंहेत्यैजगंताम्पतंयेनमोनमोंरुद्रायां
ततायिनेक्षेत्रांणाम्पतंयेनमोनमंःसूतायाहं
न्त्यैवनांनाम्पतंयेनमोनमोरोहिंताय ॥१८॥
नमोरोहिंताय।स्त्थपतंयेवृक्षाणाम्पतंयेनमो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नमो॑भु॒व॒न्तये॑वारिवस्कृ॒तायौष॑धीना॒म्पत॑ये॒
नमो॒नमो॑म॒न्त्रिणे॑वाणि॒जाय॒कक्षा॑णा॒म्पत॑ये॒न
मो॒नमः॑ऽउ॒च्चैर्घो॑षायाक्र॒न्दय॑तेप॒त्तीना॒म्पत॑
ये॒नमो॒नमः॑कृत्स्नाय॒तया॑॥१९॥ नमः॑कृत्स्ना
य॒तया॒॥धाव॑ते॒सत्त्व॑ना॒म्पत॑ये॒नमो॒नमः॒सह॑मा
नाय॒निव्या॒धिनः॑ऽआव्या॒धिनी॑ना॒म्पत॑ये॒नमो॒
नमो॑निष॒ङ्गिणे॑ककु॒भाय॑स्ते॒नाना॒म्पत॑ये॒नमो॒

॥२०॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नमो॑ निचे॒रवे॑ परिच॒राया॑रंण्यानाम्पत॑ये॒ नमो॒ न
मो॒ वञ्च॑ते ॥२०॥ नमो॒ वञ्च॑ते। परि॒वञ्च॑ते स्ताय़ू॒
नाम्पत॑ये॒ नमो॒ नमो॑ निष॒ङ्गिणं॑ऽइषुधि॒मते॒ तस्क॑
राणाम्पत॑ये॒ नमो॒ नमः॑ सृका॒यिभ्यो॒ जिघां॑ꣳ
सद्भ्यो मुष्णताम्पत॑ये॒ नमो॒ नमो॑ऽसि॒मद्भ्यो॒ नक्त॒
ञ्चर॑द्भ्यो विकृ॒न्तानाम्पत॑ये॒ नमः॑ ॥२१॥ नमः॑ऽ
उष्णीषि॒णे। गिरिच॒राय॑ कुलु॒ञ्चानाम्पत॑ये॒ न

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रु० मोनमःऽइषुमद्भ्योधन्वायिभ्यश्चवोनमोनमःऽ अ० ५
॥२१॥ आतन्वानेभ्यःप्रतिदधानेभ्यश्चवोनमो
नमःऽआयच्छद्भ्योऽस्यद्भ्यश्चवोनमोनमोविसृज
द्भ्यः।२२।नमोविसृजद्भ्योविध्यद्भ्यश्चवोन
मोनमःस्वपद्भ्योजाग्रद्भ्यश्चवोनमोनमःशया
नेभ्यऽआसीनेभ्यश्चवोनमोनमस्तिष्ठद्भ्योधा ॥२१॥
वद्भ्यश्चवोनमोनमःसभाभ्यः।।२३।।नमः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सभाभ्यः। सभापतिभ्यश्च वो नमो नमोऽश्वे
भ्योऽश्वपतिभ्यश्च वो नमो नमऽआव्याधिनी
भ्यो विविध्यन्तीभ्यश्च वो नमो नमऽउगं
णाभ्यस्तृंहतीभ्यश्च वो नमो नमो गणेभ्य
ः।२४। नमो गणेभ्यो। गणपतिभ्यश्च वो नमो
नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गृ
त्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भ्यो विश्वरूपेभ्यश्च वो नमो नमः सेनाभ्यः
।२५। नमः सेनाभ्यः सेनानिभ्यश्च वो नमो
नमो रथिभ्यो ऽरथेभ्यश्च वो नमो नमः क्ष
त्तृभ्यः सङ्ग्रहीतृभ्यश्च वो नमो नमो महद्भ्यो ऽ
अर्भकेभ्यश्च वो नमः ।२६। नमस्तक्षभ्यो ।
रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः क
र्मारेभ्यश्च वो नमो नमो निषादेभ्यः पुञ्जिष्ठे
||२२||
CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भ्यश्च वो नमो नमः श्वनिभ्यो मृगयुभ्यश्च

वो नमो नमः श्वभ्यः ॥२७॥ नमः श्वभ्यः । श्व

पतिभ्यश्च वो नमो नमो भवाय च रुद्राय च नमः

शर्वाय च पशुपतये च नमो नीलग्रीवाय च

शितिकण्ठाय च नमः कपर्दिने ॥२८॥ नमः

कपर्दिने । च व्युप्तकेशाय च नमः सहस्राक्षाय

च शतधन्वने च नमो गिरिशयाय च शिपिविष्टा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यंच्चनमोमीदुष्टमायचेषुमतेचनमोह्रस्वाय
॥२३॥ ।२९।नमोह्रस्वाय। चवामनायंचनमोबृहते
चवर्षीयसेचनमोवृद्धायंचसवृधेचनमोऽग्र्या
यच्चप्प्रथमायंचनमऽआशवे।३०। नमऽआश
वे। चाजिरायंचनमःशीघ्र्यायंचशीभ्याय
चनमऊर्म्म्यायचावस्वन्यायचनमोनादेया ॥२३॥
यंचद्वीप्प्यायच॥३१॥नमोज्ज्येष्ठाय। च क

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

निष्ठायंचनमः पूर्व्वजायंचापरजायंचनमोम
द्ध्यमायंचापगल्भायंचनमोजघन्यायचबु
ध्न्यायचनमःसोभ्याय ॥ ३२ ॥ नमःसो
भ्याय।चप्प्रतिसर्य्यायचनमोयाम्म्यायचक्षे
म्म्यायचनमःश्लोक्यायचावसान्यायचनम
ऽउर्व्वर्य्यायचखल्ल्यायचनमोवन्न्याय ॥३३॥
नमोवन्न्याय।चकक्ष्यायचनमःश्रवायचप्प्र

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तिश्रवायचनमऽआशुषेणायचाशुरथायचन
॥२४॥ मःशूरायचावभेदिनेचनमोबिल्मिने॥३४॥
नमोबिल्मिने। चकवचिनेचनमोवर्म्मिणेच
वरूथिनेचनमःश्रुतायचश्रुतसेनायचनमोदु
न्दुभ्यायचाहनन्यायचनमोधृष्णवे।३५॥
नमोधृष्णवे । चप्रमृशायचनमोनिषङ्गिणे ॥२५॥
चेषुधिमतेचनमस्तीक्ष्णेषवेचायुधिनेचनमः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्वायुधायंचसुधन्वंनेच ॥ ३६॥ नमुःस्स्रुत्यां
य । चुपत्थ्यांयचुनमुःकाट्यांयचुनीप्प्यांय
चुनमुःकुल्ल्यांयचसरुस्यांयचुनमोनादेया
यंचवैशुन्तायंचुनमुःकूप्प्यांय ॥ ३७॥ नमुः
कूप्प्यांय । चावुट्ट्यांयचुनमोवीद्ध्र्यांयचात्

प्प्यायचुनमोमेग्घ्यांयचविद्युत्यांयचुनमोव
र्ष्यांयचावुर्ष्यांयंचुनमोवात्यांय ॥ ३८॥ न

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रु० मोव्वात्याय । चरेष्म्भ्यायचनमोव्वास्तव्याय अ० ५
॥२५॥ चव्वास्तुपायचनमः सोमायचरुद्रायचनम
स्ताम्म्रायचारुणायचनमः शङ्गवे ॥३९॥ न
मः शङ्गवे। चपशुपतयेचनमऽउग्ग्रायचभीमा
यचनमोग्ग्रेवधायचदूरेवधायचनमोहन्त्रेचह
नीयसेचनमोवृक्षेभ्योहरिकेशेभ्योनमस्ता ॥२५॥
राय ॥४०॥ नमः शम्भवाय । चमयोभवाय

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चनमः शङ्करायचमयस्करायचनमः शिवा
यचशिवतरायच॥४१॥ नमः पार्य्याय । चा
वार्य्यायचनमः प्रतरणायचोत्तरणायचन
मस्तीर्थ्यायचकूल्यायचनमः शष्प्यायच
फेन्यायचनमः सिकत्याय।४२।नमः सिक
त्याय।चप्रवाह्यायचनमः किꣳशिलायच
क्षयणायचनमः कपर्दिनेचपुलस्तयेचनमऽइ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रिण्यायचप्रपथ्यायचनमोव्रज्याय॥४३॥
॥२६॥ नमोव्रज्याय।चगोष्ठ्यायचनमस्तल्प्याय
चगेह्यायचनमोहृदय्यायचनिवेष्प्यायचन
मःकाट्यायचगह्वरेष्ठायचनमःशुष्क्याय
॥४४॥नमःशुष्क्याय। चहरित्यायचनमः
पाꣳसव्यायचरजस्यायचनमोलोप्यायचो ॥२६॥
लप्यायचनमऽऊर्व्यायचसूर्व्यायचनमःप

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

र्णाय॥४५॥ नमः पर्णाय च पर्णशदाय च नमः

उद्गुरमाणाय चाभिघ्नते च नमऽआखिदते

च प्रखिदते च नमऽइषुकृद्भ्यो धनुष्कृद्भ्यश्च वो न

मो नमो वः किरिकेभ्यो देवानां हृदयेभ्यो न

मो विचिन्वत्केभ्यो नमो विक्षिणत्केभ्यो न

मऽआनिर्हतेभ्यः॥४६॥ द्रापेऽअन्धसस्पते

दरिद्र नीललोहित॥ आसां प्रजानामेषां पशू

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नाम्माभेम्मारोझ्मोचंनःकिञ्चनाममंमत्।४७।
इमारुद्रायंतवसेंकपर्द्दिनेक्षयद्वीरायप्रभंरा
महेमतीः॥ यथाशमसंद्विपदेचतुष्पदेविश्वं
म्पुष्टङ्ग्रामेऽअस्मिन्नंनातुरम् ॥ ४८ ॥ याते
रुद्रशिवातनूःशिवाविश्वाहांभेषजी॥शिवारु
तस्यंभेषजीतयांनोमृडजीवसे॥४९॥ परिंनो
रुद्रस्यंहेतिर्वृणक्तुपरिंत्वेषस्यंदुर्म्मतिरंघा।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यो॒॑ऽ॥ अवं॒स्थि॒राम॒घवं॑द्भ्यस्त॒नु॒ष्व॒मीढ्व॑स्तो॒

काय॒तन॑याय मृड॥५०॥ मीढु॑ष्टम॒शिव॑तम ।

शि॒वोन॑÷सु॒मना॑भव।प॒र॒मेवृ॒क्षऽआयु॑धन्नि॒धा

य॒कृत्तिं॒वसा॑न॒ऽआच॑र॒पिना॑क॒म्बिभ्र॒दाग॑हि

॥५१॥ विकि॑रिद्र॒विलो॑हित॒ । नम॑स्तेऽअस्तु भ

गवः॥ यास्ते॑स॒हस्र॑ꣳहे॒तयो॒ऽन्यम॒स्मन्निव॑प

न्तु॒ताः॥५२॥ स॒हस्रा॑णि सहस्र॒शोबा॒ह्वोस्तव॑

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

॥२८॥ हेतयः॥ तासामीशानोभगवःपराचीनामुखा
कृधि॥५३॥ असंख्यातासहस्राणि। येरुद्राऽ
अधिभूम्याम् ॥ तेषांꣳसहस्रयोजनेवधन्वा
नितन्मसि॥५४॥ अस्मिन्महत्यर्णवेन्तरिक्षे
भवाऽअधि। तेषांꣳसहस्रयोजनेवधन्वानित
न्मसि॥५५॥ नीलग्रीवाःशितिकण्ठादिवꣳ ॥२८॥
रुद्राऽउपश्रिताः॥ तेषांꣳसहस्रयोजनेवध

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न्वांनितन्मसि ॥ ५६ ॥ नीलंग्रीवाःशितिक
ण्ठाःशर्व्वाअधःक्षमाचराः ॥ तेषांꣳसहस्र
योजनेवधन्वांनितन्मसि॥५७॥येवृक्षेषुश
ष्पिञ्जरानीलग्ग्रीवाव्विलोहिताः॥ तेषांꣳस
हस्रयोजनेवधन्वांनितन्मसि ॥५८॥ येभूता
नामधिपतयोव्विशिखासःकपर्द्दिनः॥ तेषां
ꣳसहस्रयोजनेवधन्वांनितन्मसि ॥५९॥ये

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पृथाम्पथिरक्षयऽऐलबृदाऽआयुर्युधः। तेषां
ᳫंसहस्रयोजनेवधन्न्वानितन्मसि ॥६०॥ ये
तीर्थानिप्प्रचरन्तिसृकाहस्तानिषङ्गिणः॥ते
षांᳫंसहस्रयोजनेवधन्न्वानितन्मसि॥६१॥
येन्नेषुविविद्ध्यन्तिपात्रेषुपिबतोजनान्॥ तेषां
ᳫंसहस्रयोजनेवधन्न्वानितन्मसि॥६२॥यऽ
एतावन्तश्चभूयाᳫंसश्चदिशोरुद्द्राव्वितस्थि

॥२९॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रे ॥ तेषां᳚सहस्रयोजनेवधन्वानितन्मसि
॥६३॥नमोस्तु। रुद्रेभ्योयेदिवियेषांवर्षमि
षवः ॥ तेभ्योदशप्राचीर्दशदक्षिणादशप्र
तीचीर्दशोदीचीर्दशोर्ध्वाः ॥ तेभ्योनमोऽअ
स्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्च
नोद्वेष्टितमेषाञ्जम्भेदध्मः ॥६४॥ नमोस्तु।
रुद्रेभ्योयेन्तरिक्षेयेषांवातऽइषवः॥तेभ्यो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दशप्प्राचीर्द्दशंदक्षिणादशंप्प्रतीचीर्द्दशोदीची
॥३०॥ र्द्दशोर्द्ध्वाः॥ तेभ्योनमोऽअस्तुतेनोवन्तुतेनो
मृडयन्तुतेयन्द्विष्मोयश्चनोद्वेष्टितमेषाञ्ज
म्भेदध्मः॥६५॥ नमोस्तु। रुद्रेभ्योयेपृथि
व्यांयेषामन्नमिषवः ॥ तेभ्योदशप्प्राचीर्द्द
शंदक्षिणादशंप्प्रतीचीर्द्दशोदीचीर्द्दशोर्द्ध्वाः॥ ॥३०॥
तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेय

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न्द्विष्मोयश्च्चनोद्द्वेष्टितमेषाञ्जम्भेदद्ध्मः ॥
॥ ६६ ॥ इति रुद्रे पञ्चमोऽध्यायः ॥ ५ ॥

हरिः ॐ ॥ व्वयꣳसोमव्व्रतेतवमनस्तनूषुबिभ्र
तः॥प्रजावन्तꣳसचेमहि॥१॥एषतेरुद्रभा
गःसहस्वस्राम्बिकयातञ्जुषस्वस्वाहैषतेरु

❀ अथात्र द्वितीयप्रकारः—हरिः ॐ नमस्ते०(इत्यारभ्य) मान-
६ स्तोके०(इतिपर्यन्ताः षोडश मन्त्राः)॥१६॥एषते०॥१७॥ अवरुद्र०
॥१८॥ नमस्ते०॥१९॥ यातें० ॥ २० ॥ नतम्विदाथयऽइमाजजाना-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

द्र भागऽआखुस्तेंपशुः ॥२॥ अवंरुद्रमंदीमह्य
॥३१॥ वंदेवन्त्र्यंम्बकम् ॥ यथांनोव्वस्यंसस्करद्यथां
नः श्श्रेयंसस्करद्यथांनोव्यवसाययांत् ॥३॥
भेषजमंसि । भेषजङ्गवेश्श्वांयपुरुंषायभेषजम् ।
सुखम्मेषायंमेष्ष्यै ॥४॥ त्र्यंम्बकंय्यजामहे ।

व्ययद्युष्म्माकमन्तंरम्बभूव ॥ नीहारेणप्प्रावृंताजल्प्यांचासुतृपंऽउक्थ- ॥३१॥
शासंश्श्चरन्ति ॥२१॥ व्विश्श्वकंम्म्मांह्यजंनिष्टद्देवऽआदिद्द्गंन्धर्व्वोऽअं-
भवद्द्वितीयंः ॥ तृतीयंः पिताजंनितौषधीनामपाङ्गर्भंव्व्यदधात्पुरु-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सुगन्धिम्पुष्टिवर्द्धनम् । उर्व्वारुकमिव बन्धना
न्मृत्योर्म्मुक्षीयमामृतात् । त्र्यंम्बकंय्यजामहे
सुगन्धिम्पतिवेदनम् । उर्व्वारुकमिव बन्धनादि
तोमुक्षीयमामुतः ॥५॥ एतत्तेरुद्रावसन्तेनं
परोमूजवतोतीहि ॥ अवततधन्वापिनाकाव

त्रा ॥२२॥ मीढुष्टम० ॥२३॥ विकिरिद्र० ॥२४॥ सहस्राणि० ॥२५॥
असंङ्ख्याता० ॥२६॥ व्वयꣳसोम० ॥२७॥ एषते० ॥२८॥ अवरुद्र०
॥२९॥ भेषजमसि० ॥३०॥ त्र्यंम्बकं० ॥ त्र्यंम्बकं० ॥३१॥ एतत्ते०

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सꣳकृत्तिवासाऽअहिꣳसन्नꣳशिवोतीहि ॥६॥

॥३२॥ त्र्यायुषञ्जमदग्नेःकश्यपस्यत्र्यायुषम् ॥ य

द्देवेषुत्र्यायुषन्तन्नोऽअस्तुत्र्यायुषम् ॥ ७ ॥

शिवोनामासिस्वधितिस्तेपितानमस्तेऽअस्तु

मामाहिꣳसीः ॥ निवर्त्तयाम्म्यायुषेन्नाद्या

॥३२॥ त्र्यायुष० ॥३३॥ शिवोनामा० ॥३४॥ उग्रश्चभीमश्च० ॥३५॥ अ-
ग्निꣳहृदयेन० ॥३६॥ उग्रँल्लोहितेन० ॥३७॥ स्वस्तिनऽइन्द्रो० ॥३८॥
पयꣳपृथिव्या० ॥३९॥ विष्णोरराट० ॥४०॥ अग्निर्देवता० ॥४१॥ ॥३२॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यप्प्रजननायरायस्प्पोषायसुप्प्रजास्त्वायसुवीर्य्याय ॥८॥ इति रुद्रे षष्ठोऽध्यायः ॥६॥

हरिः ॐ ॥उग्ग्रश्च । भीमश्च ध्वान्तश्च धुनिश्च ॥ सासहाँश्चाभियुग्वा चा विक्षिपः स्वाहा ।१। अग्निर्ठ० हृदयेनाशनिर्ठ० हृदयाग्ग्रेण पशुपतिङ्कृत्स्न हृदयेन भवंय्यक्ना ॥ शर्वम्मतस्नाभ्यामी

द्यौः शान्ति० ॥४२॥ (पश्चात् वाजश्च मे० ऋचं वाचं० इत्यध्यायद्वयं पठेत्) अस्यात्र लेखकः—शास्त्री उत्सवलाल बलदेवराम शर्मा ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शांनम्मन्युनांमहादेवमंन्तःपर्शव्येनोग्ग्रन्दे
॥३३॥ वंवांनिष्ठुनांवासिष्ठहनुःशिङ्गीनिकोश्याभ्यां
म् ॥२॥ उग्ग्रँल्लोहितेन। मित्रँसौव्व्रत्येनरुद्र
न्दौर्व्रत्येनेन्द्रम्प्रक्रीडेनंमरुतोबलेनसाद्ध्या
न्प्रमुदा॥ भवस्यकण्ठ्यँरुद्रस्यान्तःपार्श्व्यं
म्महादेवस्ययकृच्छर्वस्यवनिष्ठुःपशुपतेःपु ॥३३॥
रीतत् ॥३॥ लोमभ्यःस्वाहा । लोमभ्यः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्वाहांत्वचेस्वाहांत्वचेस्वाहालोहितायस्वा
हालोहितायस्वाहामेदोभ्यःस्वाहामेदोभ्यः
स्वाहांमांꣳसेभ्यःस्वाहांमांꣳसेभ्यःस्वा
हास्नावभ्यःस्वाहास्नावभ्यःस्वाहास्थ
भ्यःस्वाहास्थभ्यःस्वाहांमज्जभ्यःस्वा
हांमज्जभ्यःस्वाहा ॥ रेतसेस्वाहांपायवेस्वा
हा ॥४॥ आयासायस्वाहा । प्रायासायस्वा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हांसंय्यासायस्वाहांव्वियासायस्वाहोद्यासा
यस्वाहां ॥ शुचेस्वाहाशोचतेस्वाहाशोचमा
नायस्वाहाशोकायस्वाहां ॥ ५ ॥ तपसेस्वा
हा । तप्प्यतेस्वाहातप्प्यमानायस्वाहातप्ता
यस्वाहांघर्म्मायस्वाहां॥ निष्कृत्यैस्वाहाप्प्रा
यश्चित्यैस्वाहांभेषजायस्वाहां ॥ ६ ॥ यमाय
स्वाहान्तकायस्वाहांमृत्यवेस्वाहां ॥ ब्रह्मणे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्वाहा ब्रह्महत्यायै स्वाहा विश्वेभ्यो देवेभ्य

स्वाहा द्यावापृथिवीभ्याᳬं स्वाहा ॥ ७ ॥

इति रुद्रे सप्तमोऽध्यायः ॥ ७ ॥

हरिः ॐ ॥ वाजश्च । मे प्रसवश्च मे प्रयतिश्च मे प्र

सितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोक

श्च मे श्रवश्च मे श्रुतिश्च मे ज्योतिश्च मे स्वश्च

मे यज्ञेन कल्पन्ताम् ॥ १ ॥ प्राणश्च । मे पानश्च

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मेध्यानञ्चमेसुंश्चमेचित्तञ्चमऽआधीतञ्चमेवा
॥३५॥ क्चमेमनश्चमेचक्षुश्चमेश्रोत्रञ्चमेदक्षश्चमे
बलञ्चमेयज्ञेनकल्पताम् ॥२॥ ओजश्च । मे
सहश्चमऽआत्माचमेतनूश्चमेशर्म्मचमेव
र्म्मचमेङ्गानिचमेस्थीनिचमेपरूꣳषिचमेश
रीराणिचमऽआयुश्चमेजराचमेयज्ञेनकल्प ॥३५॥
न्ताम् ॥३॥ ज्यैष्ठ्यञ्च । मऽआधिपत्यञ्चमे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मन्युश्चमेभामश्चमेमश्चमेम्भश्चमेजेमाचमे
महिमाचमेवरिमाचमेप्रथिमाचमेवर्षिमाच
मेद्राघिमाचमेवृद्धञ्चमेवृद्धिश्चमेयज्ञेनक
ल्पन्ताम् ॥ ४ ॥ (न०) ॥ सत्यञ्च । मेश्रद्धा
चमेजगच्चमेधनञ्चमेविश्वञ्चमेमहश्चमेक्री
डाचमेमोदश्चमेजातञ्चमेजनिष्यमाणञ्चमे
सूक्तञ्चमेसुकृतञ्चमेयज्ञेनकल्पन्ताम् ॥ ५ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

६० ऋतञ्च । मेमृतञ्चमेयक्ष्मञ्चमेनामयच्चमेजी अ० ८
॥३६॥ वातुश्चमेदीर्घायुत्वञ्चमेनमित्रञ्चमेभयञ्चमे
सुखञ्चमेशयनञ्चमेसूषाश्चमेसुदिनञ्चमेयज्ञे
नकल्पन्ताम् ॥६॥ यन्ताच । मेधर्त्ताचमेक्षे
मश्चमेधृतिश्चमेविश्वञ्चमेमहश्चमेसंविच्चमे
ज्ञात्रञ्चमेसूश्चमेप्रसूश्चमेसीरञ्चमेलयश्चमेय ॥२६॥
ज्ञेनकल्पन्ताम् ॥७॥ शञ्चमेमयश्चमेप्रिय

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्चमेनुकामश्चमेकामश्चमेसौमनसश्चमेभग
श्चमेद्रविणश्चमेभद्रश्चमेश्रेयश्चमेवसीयश्चमे
यशश्चमेयज्ञेनकल्पन्ताम् ॥८॥ (न०) ॥ऊ
र्क्च । मे सूनृताचमेपयश्चमेरसश्चमेघृतश्चमे
मधुचमेसग्धिश्चमेसपीतिश्चमेकृषिश्चमेवृ
७ ष्टिश्चमेजैत्रश्चमऽऔद्भिद्यश्चमेयज्ञेनकल्प
न्ताम्॥९॥ रयिश्च । मेरायश्चमेपुष्टश्चमेपुष्टि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्चमेव्विभुचमेप्रभुचमेपूर्णञ्चमेपूर्णतरञ्चमेकु
॥३७॥ यवञ्चमेक्षितञ्चमेन्नञ्चमेक्षुच्चमेयज्ञेनकल्प
न्ताम् ॥ १० ॥ व्वित्तञ्च । मेवेद्यञ्चमेभूतञ्चमे
भविष्यच्चमेसुगञ्चमेसुपथ्यञ्चमऽऋद्धञ्च
मऽऋद्धिश्चमेक्लृप्तञ्चमेक्लृप्तिश्चमेमतिश्चमे
सुमतिश्चमेयज्ञेनकल्पन्ताम् ॥११॥ व्व्रीहय ॥३७॥
श्च । मेयवाश्चमेमाषाश्चमेतिलाश्चमेमुद्गाश्च

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मेखल्वाश्चमेप्रियङ्गवश्चमेणवश्चमेश्यामाकां

श्चमेनीवाराश्चमेगोधूमाश्चमेमसूराश्चमेयज्ञे

नंकल्पन्ताम् ॥१२॥ (न०)॥ अश्माच । मे

मृत्तिकाचमेगिरयश्चमेपर्वताश्चमेसिकताश्च

मेवनस्पतयश्चमेहिरण्यञ्चमेयश्चमेश्यामञ्च

मेलोहञ्चमेसीसञ्चमेत्रपुचमेयज्ञेनकल्पन्ता

म् ॥ १३ ॥ अग्निश्च । मऽआपश्चमेवीरुधश्च

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मेऽओषधयश्चमेकृष्टपच्याश्चमेकृष्टपच्याश्च
मेग्राम्म्याश्चमेपशवऽआरण्ण्याश्चमेवित्तञ्च
मेवित्तिश्चमेभूतञ्चमेभूतिश्चमेयज्ञेनंकल्प
न्ताम् ॥१४॥ वसुंच। मेवसतिश्चमेकर्म्मंच
मेशक्तिश्चमेर्थश्चमऽएमश्चमऽइत्याचंमेगति
श्चमेयज्ञेनंकल्पन्ताम् ॥ १५ ॥ (न०)॥ अ
ग्निश्च। मऽइन्द्रश्चमेसोमश्चमऽइन्द्रश्चमेसवि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ताचंमऽइन्द्रंश्चमेसरंस्वतीचमऽइन्द्रंश्चमेपू
षाचंमऽइन्द्रंश्चमेबृहस्पतिंश्चमऽइन्द्रंश्चमेय
ज्ञेनंकल्पताम्॥ १६ ॥ मित्रश्चं । मऽइन्द्रंश्च
मेवरुणश्चमऽइन्द्रंश्चमेधाताचमऽइन्द्रंश्चमे
त्वष्टांचमऽइन्द्रंश्चमेमरुतंश्चमऽइन्द्रंश्चमेवि
श्वेंचमेदेवाऽइन्द्रंश्चमेयज्ञेनंकल्पन्ताम् ॥
॥१७॥ पृथिवीचं । मऽइन्द्रंश्चमेन्तरिंक्षश्चम

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रु० ऽइन्द्रश्चमेद्यौश्चमऽइन्द्रश्चमेसमाश्चमऽइन्द्र अ०८
॥३९॥ श्चमेनक्षत्राणिचमऽइन्द्रश्चमेदिशश्चमऽइन्द्र
श्चमेयज्ञेनकल्पन्ताम् ॥१८॥ (न०)॥ अꣳ
शुश्च । मेरश्मिश्चमेदाभ्यश्चमेधिपतिश्चम
ऽउपाꣳशुश्चमेन्तर्यामश्चमऽऐन्द्रवायवश्च
मेमैत्रावरुणश्चमऽआश्विनश्चमेप्रतिप्रस्था ॥३९॥
नश्चमेशुक्रश्चमेमन्थीचमेयज्ञेनकल्पन्ताम्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

॥ १९ ॥ आग्रयणश्च । मेवैश्वदेवश्च मेध्रुवश्च
मेवैश्वानरश्च मऽऐन्द्राग्नश्च मेमहावैश्वदेवश्च
मेमरुत्वतीयाश्च मेनिष्केवल्यश्च मेसावित्रश्च
मेसारस्वतश्च मेपात्नीवतश्च मेहारियोजन
श्च मेयज्ञेनकल्पन्ताम् ॥ २० ॥ स्रुचश्च । मे
चमसाश्च मेवायव्यानिच मेद्रोणकलशश्च मे
ग्रावाणश्च मेधिषवणेच मेपूतभृच्च मऽआधव

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रु० नीयंश्च मे वेदिश्च मे बर्हिश्च मेऽवभृथश्च मे स्वगा अ० ८
॥४०॥ कारश्च मे यज्ञेन कल्पन्ताम् ॥ २१ ॥ (न० ॥)
अग्निश्च । मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे प्रा
णश्च मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे दिति
श्च मे द्यौश्च मेऽङ्गुलयः शक्वरयो दिशश्च मे यज्ञे
न कल्पन्ताम् ॥२२॥ व्रतञ्च । मेऽऋतवश्च ॥४०॥
मे तपश्च मे संवत्सरश्च मेऽहोरात्रेऽऊर्वष्ठीवे बृह

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

द्रथन्तरे च मे यज्ञेन कल्पन्ताम् ॥ २३ ॥

(न०)॥ एका च । मे तिस्रश्च मे तिस्रश्च मे पञ्च च मे पञ्च च मे सप्त च मे सप्त च मे नव च मे नव च मऽएकादश च मऽएकादश च मे त्रयोदश च मे त्रयोदश च मे पञ्चदश च मे पञ्चदश च मे सप्तदश च मे सप्तदश च मे नवदश च मे नवदश च मऽएकविꣳशतिश्च मऽएकविꣳशतिश्च मे त्रयो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

६० विꣳशतिश्चमे॒त्रयो॑विꣳशतिश्चमे॒पञ्च॑विꣳश अ०८
॥४१॥ तिश्चमे॒पञ्च॑विꣳशतिश्चमेस॒प्तविꣳशतिश्चमे
स॒प्तविꣳशतिश्चमे॒नव॑विꣳशतिश्चमे॒नव॑विꣳ
शतिश्चम॒ऽएक॑त्रिꣳशच्चम॒ऽएक॑त्रिꣳशच्चमे॒
त्रय॑स्त्रिꣳशच्चमेय॒ज्ञेन॑कल्पन्ताम् ॥ २४ ॥
(न०) ॥ चतस्रश्च । मे॒ष्टौच॑मे॒ष्टौच॑मे॒द्वाद॑शच ॥४१॥
मे॒द्वाद॑शचमे॒षोड॑शचमे॒षोड॑शचमे॒विꣳशति

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्चंमेविꣳशतिश्चंमेचतुर्विꣳशतिश्चमेचतुर्विꣳ
शतिश्चमेष्टाविꣳशतिश्चमेष्टाविꣳशतिश्चमे
द्वात्रिꣳशच्चमेद्वात्रिꣳशच्चमेषट्त्रिꣳशच्चमेष
ट्त्रिꣳशच्चमेचत्वारिꣳशच्चंमेचत्वारिꣳशच्चं
मेचतुश्चत्वारिꣳशच्चमेचतुश्चत्वारिꣳशच्चमे
ष्टाचंत्वारिꣳशच्चमेयज्ञेनकल्पन्ताम् ।२५।
(न०)॥ त्र्यविश्च । मेत्र्यवीचंमेदित्यवाट्चंमे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रु० दित्यौहीचमेपञ्चाविश्चमेपञ्चावीचमेत्रिवत्स अ०१८
॥४२॥ श्चमेत्रिवत्साचमेतुर्य्यवाट्चमेतुर्य्यौहीच
मेयज्ञेनंकल्पन्ताम् ॥२६॥ पष्ठवाट्च । मे
पष्ठौहीचमऽउक्षाचमेवशाचमऽऋषभश्चमे
वेहच्चमेऽनड्वाँश्चमेधेनुश्चमेयज्ञेनंकल्पन्ताम्
॥२७॥ (न०) ॥ वाजायस्वाहा । प्रसवाय ॥४२॥
स्वाहापिजायस्वाहाक्रतवेस्वाहावसवेस्वाहा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हस्पतयेस्वाहाह्हँमुग्ग्धायस्वाहामुग्ग्धायवै
नँशिनायस्वाहाविनँशिनऽआन्त्यायना
यस्वाहान्त्यायभौवनायस्वाहाभुवनस्यपत
येस्वाहाधिपतयेस्वाहाप्प्रजापतयेस्वाहा ॥
इयन्तेराण्मित्राययन्तासियमनऽऊर्ज्जेत्वा
वृष्ट्यैत्वाप्प्रजानान्त्वाधिपत्याय ॥ २८ ॥
आयुर्य्यज्ञेन। कल्प्पताम्प्प्राणोयज्ञेनकल्प्प

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रु० दित्यौहीचमेपञ्चाविश्चमेपञ्चावीचमेत्रिवत्स अ०१८

॥८२॥ श्चमेत्रिवत्साचमेतुर्य्यवाट्चमेतुर्य्यौहीच

मेयज्ञेनकल्पन्ताम् ॥२६॥ पष्ठवाट्च । मे

पष्ठौहीचमऽउक्षाचमेवशाचमऽऋषभश्चमे

वेहच्चमेनड्वाँश्चमेधेनुश्चमेयज्ञेनकल्पन्ताम्

॥२७॥ (न०) ॥ वाजायस्वाहा । प्प्रसवाय ॥४२॥

स्वाहापिजायस्वाहाक्क्रतवेस्वाहावसवेस्वाहा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हस्पतये स्वाहाऽहं मुग्धाय स्वाहा मुग्धाय वै

नशिनाय स्वाहा विनशिन आन्त्यायनाय

स्वाहान्त्याय भौवनाय स्वाहा भुवनस्य पतये स्वाहाधिपतये स्वाहा प्रजापतये स्वाहा ॥

इयन्ते राण्मित्राय यन्तासि यमन ऊर्जे त्वा

वृष्ट्यै त्वा प्रजानान्त्वाधिपत्याय ॥ २८ ॥

आयुर्यज्ञेन कल्पताम्प्राणो यज्ञेन कल्प

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रु० ताञ्चक्षुर्य्यज्ञेनंकल्पताᳪं श्रोत्रंय्यज्ञेनंक अ० ८

॥४३॥ ल्पताम्वाग्ग्यज्ञेनंकल्पताम्मनोयज्ञेनंक

ल्पतामात्मायज्ञेनंकल्पताम्ब्रह्मायज्ञेनं

कल्पताञ्ज्योतिर्य्यज्ञेनंकल्पताᳪं स्वर्य्य

ज्ञेनंकल्पताम्पृष्ठंय्यज्ञेनंकल्पतांयज्ञोयज्ञे

नंकल्पताम् ॥ स्तोमश्चयजुश्चऽऋक्चसामं ॥४२॥

चबृहच्चरथन्तरञ्च । स्वर्द्देवाऽअगन्मामृता

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ऽअभूमप्प्रजापंतेᳬंप्प्रजाऽअंभूमुद्वेट्स्वाहां ।

॥२१॥ इति रुद्रेऽष्टमोऽध्यायः ॥ ८ ॥

॥हरिःॐ॥ ऋचंवाचम्प्रपंद्येमनोयजुᳬंप्प्रपंद्ये

सामंप्प्राणम्प्रपंद्येचक्षुᳬंश्रोत्रंप्रपंद्ये॥वागोजंः

सुहौजोमयिंप्प्राणापानौ॥१॥यन्मेंछिद्रञ्चक्षुं

षोहृदंयस्यमनंसोवातिंतृणम्बृहुस्प्पतिंर्म्मेंत

द्दंधातु॥शन्नोंभवतुभुवंनस्ययस्प्पतिंः॥२॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

 भूर्भुव॒ःस्व॒÷ ।तत्त्स॑वि॒तुर्व्वरे॑ण्य॒म्भर्गो॑दे॒वस्य॑
धीमहि ॥ धियो॒यो नः॑÷प्रचो॒दया॑त् ॥३॥ कया॑
नश्चि॒त्रऽआभु॑वदू॒तीस॒दावृ॑धः॒सखा॑ । कया॒श
चि॑ष्ठया॒वृता ॥४॥ कस्त्वा॑स॒त्योमदा॑ना॒म्मꣳ
हि॑ष्ठोमत्स॒दन्ध॑सः ॥ दृ॒ढा॑चि॒दा॒रुजे॒वसु॑ ॥५॥
अ॒भीषुणः॑ सखी॑नामवि॒ताज॑रितॄ॒णाम् ॥ श॒त
म्भ॑वास्यू॒तिभि॑÷ ॥६॥ कया॒त्वन्न॑ऽऊ॒त्याभि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्प्रमंन्दसेव्वृषन् ॥ कयांस्तोतृभ्भ्युऽआभंर ॥
॥ ७ ॥ इन्द्रोविश्वंस्यराजति ॥ शन्नोंऽअस्तु
द्विपदेशञ्चतुंष्पदे ॥८ शनोंमित्रः शंव्वरुंणः
शन्नोंभवत्वर्य्यमा ॥ शन्नऽइन्द्रोबृहस्पतिः
शन्नोव्विष्णुंरुरुक्क्रमः ॥ ९ ॥ शन्नोव्वातंः ।
पवताᳩंशन्नंस्तपतुसूर्य्यंः ॥ शन्नःकनिक्क्र
ददेवः पर्जन्न्योंऽअभिवंर्षतु ॥ १० ॥ अहांनि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शम्भंवन्तुनःँशर्ठ०रात्रीःँप्प्रतिंधीयताम् ॥ श
न्नऽइन्द्राग्नीभंवतामवोंभिःँशन्नऽइन्द्रावरुणा
रातहंव्या ॥ शन्नऽइन्द्रापूषणाव्वाजंसातौश
मिन्द्रासोमांसुवितायशंय्योंः ॥ ११ ॥ शन्नों
देवीरभिष्टंयऽआपोंभवन्तुपीतयें ॥ शंय्योर
भिस्त्रंवन्तुनःँ ॥१२॥ स्योनापृंथिवि । नोभ
वान्नक्षरानिवेशंनी ॥ यच्छांनःँशर्म्मंसप्प्रथांःँ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

॥१३॥ आपोहि । ष्ठामयोभुवस्तानऽऊर्जेद
धातन ॥ महेरणायचक्षसे ॥१४॥ योवःशि
वतमोरसस्तस्यभाजयतेहनः॥ उशतीरिव
मातरः॥१५॥ तस्माऽअरङ्गमामवोयस्य
क्षयायजिन्वथ॥ आपोजनयथाचनः॥१६॥
द्यौःशान्तिरन्तरिक्षशान्तिःपृथिवीशा
न्तिरापःशान्तिरोषधयःशान्तिः॥ वनस्प

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

 तयꣳशान्तिर्व्विश्वेदेवाःशान्तिर्ब्रह्मशान्तिꣳ
सर्व्वꣳशान्तिꣳशान्तिरेवशान्तिꣳसामाशा
न्तिरेधि ॥ १७ ॥ दृतेदृꣳहमामित्रस्यमाच
क्षुषासर्व्वाणिभूतानिसमीक्षन्ताम् ॥ मित्रस्या
हञ्चक्षुषासर्व्वाणिभूतानिसमीक्षे ॥ मित्रस्यच
क्षुषासमीक्षामहे ॥१८॥ दृतेदृꣳहमा । ज्यो ॥४६॥
क्केसन्दृशिजीव्यासञ्ज्योक्केसन्दृशिजीव्यास

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मू ॥ १९ ॥ नमस्तेहरसेशोचिषेनमस्तेऽअ
स्त्वर्चिषे ॥ अन्याँस्तेऽअस्मत्तपन्तुहेतयः
पावकोऽअस्मभ्यꣳशिवोभव ॥२०॥ नम
स्ते । अस्तुविद्युतेनमस्तेस्तनयित्नवे ॥ नम
स्तेभगवन्नस्तुयतꣳस्वःसमीहसे ॥२१॥ य
तोयतꣳसमीहसेततोनोऽअभयङ्कुरु ॥ शन्नः
कुरुप्रजाभ्योभयन्नꣳपशुभ्यः ॥२२॥ सुमि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

६० त्रियान्ऽआपऽओषधयःसन्तुदुर्म्मित्रियास्त अ० ९
॥४७॥ स्म्मैसन्तुय्योस्म्मान्द्वेष्टियञ्चवयन्द्विष्मः
॥ २३ ॥ तच्चक्षुर्द्देवहितम्पुरस्ताच्छुक्रमुच्च
रत् ॥ पश्येमशरदःशतञ्जीवेमशरदःशत
ꣳशृणुयामशरदःशतम्प्रब्रवामशरदःशत
मदीनाःस्यामशरदःशतम्भूयश्चशरदःश ॥४७॥
तात् ॥ २४ ॥ इति रुद्रे शान्त्यध्यायः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ रुद्रे स्वस्तिप्रार्थनामन्त्राऽध्यायः ॥ हरिः
ॐ ॥ स्वस्तिनऽइन्द्रोवृद्धश्रवाः स्वस्तिनः
पूषाविश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योऽअरिष्ट
नेमिः स्वस्तिनोबृहस्पतिर्दधातु ॥ १ ॥ ॐ
पयः पृथिव्याम्पयऽओषधीषुपयोदिव्यन्त
रिक्षेपयोधाः। पयस्वतीः प्प्रदिशः सन्तुमह्य
म् ॥२॥ ॐ विष्णोरराटमसिविष्णोः श्नप्त्रे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रु० स्त्थोव्विष्णोः स्यूरसिव्विष्णोर्ध्रुवोसि ॥ वै अ०१०
॥४८॥ ष्णवमसिव्विष्णवेत्वा ॥३॥ ॐअग्निर्द्देवता
व्वातोदेवतासूर्य्योदेवताचन्द्रमादेवताव्वसवो
देवतारुद्द्रादेवतादित्यादेवतामरुतोदेवताव्वि
श्श्वेदेवादेवताबृहस्प्पतिर्द्देवतेन्द्रोदेवताव्वरु
णोदेवता ॥ ४ ॥ ॐसद्योजातम्प्रपद्यामिसद्यो ॥४८॥
जातायवैनमोनमः ॥ भवेभवेनातिभवेभवस्व

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मांभुवोद्भवायनमः ॥५॥ वामदेवायनमोज्ये
ष्ठायनमःश्रेष्ठायनमोरुद्रायनमःकालायनमः
कलविकरणायनमोबलविकरणायनमोबला
यनमोबलप्रमथनायनमःसर्वभूतदमनायन
मोमनोन्मनायनमः ॥ ६ ॥ अघोरेभ्योथघोरे
भ्योघोरघोरतरेभ्यः ॥ सर्वेभ्यःसर्वशर्वेभ्यो
नमस्तेअस्तुरुद्ररूपेभ्यः ॥ ७ ॥ तत्पुरुषाय

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विद्महेमहादेवायंधीमहि ॥ तन्नोरुद्रःप्रचोद
यात् ॥ ८ ॥ ईशानःसर्वविद्यानामीश्वरःसर्वं
भूतानाम् ॥ ब्रह्मांधिपतिर्ब्रह्मणोधिंपतिर्ब्रह्मा
शिवोमेंअस्तुसदाशिवोम् ॥ ९ ॥ ॐशिवोना
मांसिस्वधिंतिस्तेपितानमंस्तेअस्तुमामांहि
ᳪसीः ॥ निर्वर्त्तयाम्म्यायुषेन्नाद्यायप्रजननाय
रायस्पोषांयसुप्रजास्त्वायंसुवीर्य्यांय ॥ १० ॥

॥४९॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ॐ विश्वानि देव सवितर्दुरितानि परासुव ॥ स
द्भद्रन्तन्न ऽआसुव ॥११॥ ॐ द्यौः शान्तिरन्त
रिक्षᳬं शान्तिः पृथिवी शान्तिरापः शान्तिरो
षधयः शान्तिः ॥ वनस्पतयः शान्तिर्विश्वे
देवाः शान्तिर्ब्रह्म शान्तिः सर्वᳬं शान्तिः शा
न्तिरेव शान्तिः सा मा शान्तिरेधि ॥१२॥ ॐ स
र्वेषां वा एष वेदानाᳬं रसो यत्साम सर्वेषामेवै-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नमेतद्द्वेदानाᳬंरसेनाभिषिञ्चति॥१३॥इति
स्वस्तिप्रार्थनामंत्राऽध्यायः ॥ ॐशान्तिः शा
न्तिः सुशान्तिर्भवतु सर्वारिष्टशान्तिर्भवतु ॥
अनेन रुद्राभिषेककर्मणा कृतेन श्रीभवा-
नीशङ्करमहारुद्रः प्रीयतां नमम ॥ ॐ सदा-
शिवार्पणमस्तु ॥

अभिषेकान्ते ॐभूर्भुवःस्वः श्रीभवानीशङ्करदेवताभ्यो नमः आचमनं हस्तप्रक्षालनं च सम० ॥ वस्त्रम्—ॐतस्माद्यज्ञात्सर्वहुतऋ-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

च्चरं० ॐभू० श्री० नमः वस्त्रं सम० ॥ यज्ञोपवीतम्—ॐतस्मादश्वा० ॐभू० श्री०नमः यज्ञोपवीतं सम० ॥ गन्धम्—ॐतंयज्ञम्ब० ॐभू० श्री०नमः गन्धं सम० ॐभू० श्री० नमः अक्षतान्सम० ॥ पुष्पाणि—ॐयत्पुरुषं० ॐभू० श्री० नमः पुष्पाणि सम०॥ बिल्वपत्रार्पणम्—ॐ शिवोभवप्रजाभ्योमानुषीभ्यस्त्वमङ्गिरः । माद्यावांपृथिवीऽअभिशोचीर्म्मान्तरिक्षम्मावनस्पतीन् ॥ ॐभू०श्री०नमः बिल्वपत्राणि सम०॥ ॐभू० श्री०नमः सौभाग्यद्रव्याणि सम०॥ धूपम्—ॐब्राह्मणो० ॐभू० श्री०नमः धूपमाघ्रापयामि॥दीपम्—ॐचन्द्रमामनसो० ॐभू०श्री०नमः घृतपूरितनीराजनदीपं दर्शयामि॥नैवेद्यम्—ॐनाभ्याऽआ० ॐप्राणायस्वाहा ॐअपानायस्वाहा ॐव्यानायस्वाहा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ॐउदानायस्वाहा ॐसमानायस्वाहा ॐभू०श्री० नमःनैवेद्यं सम०॥
ॐभू०श्री०नमः मध्ये पानीयं उत्तरापोशनं हस्तप्रक्षालनं मुखप्रक्षा-
लनं आचमनीयं करोद्धर्तनार्थे चन्दनं च सम० ॥ मुखवासार्थे फल-
ताम्बूलम्—ॐयत्पुरुषेण० ॐभू० श्री०नमः ताम्बूलं सम० ॥ ॐभू०
श्री० नमः हिरण्यदक्षिणां सम० ॥ आरार्तिक्यम्—ॐजयगङ्गाधर-
हर, शिवजयगिरिजाधीश ॥ शिव०॥ त्वंमांपालयनित्यंकृपयाजगदी-
श ॥ हरहरहरमहादेव ॥१॥ कैलासेगिरिशिखरेकल्पद्रुमविपिने॥ शि-
व० ॥ गुंजतिमधुकरपुंजेकुंजवनेगहने॥हरहर० ॥२॥ कोकिलकुंजति
खेलति, हंसावनललिता॥शिव०॥ रचयतिकलाकलापंनृत्यतिमुदस-
हिता॥हरहर०॥३॥तस्मिँल्ललितसुदेशेशालामणिरचिता॥शिव०॥ त-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न्मध्येहरनिकटेगौरीमुदसहिता ॥हरहर०॥४॥क्रीडांरचयतिभूषांरंजि-
तनिजमीशम् ॥शिव०॥ ब्रह्मादिकसुरसेवितप्रणमतितेशीर्षम्॥हरहर०
॥५॥विबुधवधूर्बहुनृत्यतिहृदयेमुदसहिता ॥शिव०॥ किन्नरगानंकुरु-
ते, सप्तस्वरसहिता॥हरहर० ॥६॥ धिनकतथैथैधिनकतमृदङ्गवाजयते
शिव०॥क्वणक्वणललितावेणुर्मधुरंनादयते ॥ हरहर०॥७॥रुणुरुणुचर-
णेरचयतिनूपुरमुज्वलिता ॥ शिव० ॥चक्रावर्तेभ्रमयतिकुरुतेतांधिक्-
ताम्॥हरहर० ॥८॥ तांतांलुपचुपतालंमधुरंनादयते॥शिव०॥अंगुष्ठा-
ङ्गुलिनादंलस्यकतांकुरुते॥हरहर० ॥९॥ कर्पूरद्युतिगौरंपंचाननसहि-
ताम्॥शिव०॥त्रिनयनशशिधरमौलेविषधरकण्ठयुतम्॥हरहर० ॥१०॥
सुंदरजटाकलापंपावकयुतभालम् ॥शिव०॥डमरुत्रिशूलपिनाकंकर-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

धृतनृकपालम् ॥हरहर० ॥११॥शंखनिनादंकृत्वाझल्लरिनादयते॥शि-
व०॥नीराजयतेब्रह्मावेदऋचांपठते॥हरहर०॥१२॥ इतिमृदुचरणसरो-
जे हृदिकमलेधृत्वा॥शिव०॥अवलोकयतिमहेशंईशंअभिनत्वा॥हर-
हर० ॥१३॥ रुंडरचितउरमालापन्नगमुपवीतम्॥शिव०॥वामविभागे
गिरिजारूपंअतिललितम् ॥ हरहर०॥१४॥सकलशरीरेमनसिजकृत-
भस्माभरणम् ॥ शिव० ॥ इतिवृषभध्वजरूपंतापत्रयहरणम् ॥ हरहर०
॥१५॥ध्यानंआरतिसमयेहृदयेइतिकृत्वा॥शिव०॥रामंत्रिजटानाथंई-
शंअभिनत्वा ॥ हरहर०॥१६॥संगितमेवंप्रतिदिनपठनंयःकुरुते॥शि-
व० ॥ शिवसायुज्यंगच्छतिभक्त्यायःशृणुते॥हरहर०॥१७॥ॐ रुद्रह-
हंविंश्प्रजनंनम्मेऽअस्तुदर्शवीरहसर्वगण‍ंस्वस्तये । आत्मसनि-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रजासनिपशुसनिंलोकसञ्चयंभयसनिं ॥ अग्नि॑ऽप्रजाम्बहुलाम्मे क-
रोत्वन्नम्पयोरेतोऽअस्मासुधत्त ॥ ॐभू०श्री०नमः आरार्तिक्यं स-
म०॥प्रदक्षिणा—ॐसप्तास्या० ॐभू०श्री०नमःप्रदक्षिणां सम० ॥मं-
त्रपुष्पाञ्जलिः—ॐयज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माणिप्रथमान्या-
सन्। तेहनाकम्महिमानःसचन्तयत्रपूर्वेसाद्ध्याऽसन्तिदेवाः॥ॐ
राजाधिराजायप्रसह्यसाहिने। नमोवयंवैश्रवणायकुर्महे। समेकामा-
न्कामकामायमह्यं। कामेश्वरोवैश्रवणोददातु। कुबेरायवैश्रवणाय।
महाराजायनमः। ॐस्वस्ति। साम्राज्यंभौज्यंस्वाराज्यंवैराज्यंपारमे-
ष्ठ्यंराज्यंमाहाराज्यमाधिपत्यमयं समन्तपर्यायीस्यात्सार्वभौमःसार्वा-
युषआन्तादापरार्धात्। पृथिव्यैसमुद्रपर्यन्तायाएकराडिति। तदप्ये-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

षश्लोकोभिगीतोमरुतःपरिवेष्टारोमरुत्तस्यावसन्गृहे । आविक्षितस्य
कामप्रेर्विश्वेदेवाःसभासदइति ॥ ॐभू० श्री०नमः मंत्रपुष्पाञ्जलिं
नमस्कारांश्च सम० ॥ ततः शिवपार्षदपूजां कृत्वा विशेषार्घ्यः—रक्ष रक्ष
महादेव रक्ष त्रैलोक्यरक्षक । भक्तानामभयं कर्ता त्राता भव भवा-
र्णवात् ॥ वरद त्वं वरं देहि वाञ्छितं वाञ्छितार्थद । अनेन सफला-
र्घ्येण फलदोऽस्तु सदा मम ॥ ॐभू०श्री०नमः विशेषार्घ्यं सम० ॥
प्रार्थना—भूत्यालेपनभूषितः प्रविलसन्नेत्राग्निदीपाङ्कुरः कण्ठे पन्नग-
पुष्पदामसुभगो गङ्गाजलैः पूरितः । ईषत्ताम्रजटाऽग्रपल्लवयुतो न्य-
स्तो जगन्मंडपे शम्भुर्मङ्गलकुम्भतामुपगतो भूयात्सतां श्रेयसे ॥
ॐभू०श्री०नमः प्रार्थनां सम० ॥ क्षमापनम्—आवाहनं न जानामि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न जानामि तवार्चनम् । पूजां चैव न जानामि क्षमस्व परमेश्वर ॥
अर्पणम्—अनेनावाहनादिषोडशोपचारैः अन्योपचारैश्च यथाज्ञानेन यथामिलितोपचारद्रव्यैः कृतेन पूजनाख्यकर्मणा ॐ भूर्भुवः स्वः श्रीभवानीशङ्करदेवताः प्रीयन्तां नमम ॥ ॐ तत्सद्ब्रह्मार्पणमस्तु ॥

सं. १९८१ सन १९२५.

पंडित नारायण मूलजी बुकसेलर,

कालबादेवीरोड, नं० ३४७ मुंबई नं० २.

'मणिलाल इच्छाराम देसाई' इत्यनेन स्वीये 'गुजराती न्यूस'
मुद्रणयन्त्रालये मुद्रिता । कोट, वेक—हाउस लेन। मुंबई.
तच्च पण्डित नारायणमूलजीशर्मणा मुंबय्यां कालबादेवी मार्गे,
३४७ संख्यांकभवने प्रकाशितम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

जाहि- रात.

॥५४॥

पंडित नारायण मूलजी पुस्तकालय

कालवादेवी रोड, मुंबई नं. २.

शंकराचार्यकृतपंचरत्न तथा छिरत्न—विवेक चूडामणि अपरोक्षानुभूति, स्वात्मनिरूपण, आत्मबोध, वाक्यवृत्ति, साधनपंचक, हस्तामलक गुजराती टीका सहित १–४–०

युवति सौभाग्य रत्न—बालाथी मांडी वृद्धावस्थाने प्राप्त थयेल स्त्रीजाति मात्रने खास वांचवा अने विचारवा लायक उत्तम पुस्तक छे. आ पुस्तकमां स्त्रीनी प्रत्येक अवस्था माटे भिन्न भिन्न हितकारक धर्मशास्त्रनो बोध आपवामां आव्यो छे. ०–१२–०

श्रीशिवमहापुराण—(ब्रह्मविद्यानाउपदेशरूपश्रीशिवगीतासहित) (२४०००) चोवीश हजार श्लोकनुं शुद्ध गुजराती भाषान्तर ६–०–०

पौराणकर्मदर्पण—तेमां षोडशसंस्कार व्रतोद्यापन शान्तिप्रयोग नारा-

॥५४॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यणवली उत्तरक्रिया लग्न जनोई तथा श्रावणी विगेरे सम्पूर्ण विषयोथी भरपूर ६–०–०

श्रीरुद्राभिषेकानुष्ठानपद्धति—(सभाष्य) आमां पूजानो प्रकार भूमिकाशुद्धि महान्यास पंचवक्त्रपूजा रुद्राभिषेकप्रकार आर्ती मंत्रपुष्पांजलि आशीर्वादमंत्रो तथा मानसपूजा विगेरे २–०–०

होमात्मकमहारुद्रपद्धति—जेमां जपप्रकार, प्राचीसाधन, मंडपमान, कुंडादिप्रमाण, आहुति, वास्तुपूजन, अग्नि–क्षेत्रपालादिस्थापन, लिंगतोभद्र, रुद्रयंत्र, महान्यास, पीठपूजन, पंचवक्त्रपूजन, ग्रहहोम, रुद्रहोम, द्वारपालसूक्त, बलिदान, पूर्णाहुति, अभिषेक, विसर्जन; इत्यादि अत्युपयोगी विषयो आपेला छे. २–०–०

गोस्वामी श्रीतुलसीदासजी कृत रामायण—जामनगरना-शास्त्री कालीदास गोवींदजीनु करेलु भाषान्तर छपाय छे

ब्रह्मयज्ञ नित्यकर्म सहित त्रिकालसंध्या गुजराती टीकासहित ०–१–६

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

जाहि- रात.

नित्यकर्मपद्धती कर्मकाण्डीयोने अती उपयोगी आमां ५६ वीषायो छत्तां मूल्यमात्र	०–४–०
सत्यनारायणकथा, गुजराती टीका तथा आवरण पूजासहित ...	०–४–०
मुहूर्तदीपक, गुजराती टीकासहित	०–४–०
जातकचंद्रिका (ज्योतिष) गुजरातीटीकासहित	१–०–०
वैद्यसारसंग्रह, गुजराती भाषांतर मोटुं	२–०–०
रामरक्षा गुजराती टीका	०–१–०
शिवमहिम्नस्तोत्र गुजराती टीका	०–१–६
कुंडसिद्धि सटीक	०-१०-०
शुक्लयजुर्वेदीय ब्रह्मनीत्यकर्म जेमां पंचमहायज्ञ श्रावणी पार्थिव पूजन रुद्राभीषेक वेदोक्त ग्रहशान्तीप्रयोग वीगेरे घणा वीषयोनो समावेशे करनामां आवेले छे	१–८–०
नारायणकवच गु० टी०	०–१–६

पंडित नारायण मूलजी बुकसेलर, काल्वादेवीरोड, नं. ३४७ मुं. नं. २.

॥५५॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शुक्लयजुर्वेदीयानां

ब्रह्मनित्यकर्म.

जेमां प्रातरुत्थान, भूमिस्पर्श, प्रातःस्मरण, मूत्रपुरीषोत्सर्ग, दन्तधावन, प्रातःस्नान, हेमाद्रिकृतस्नानसंकल्प, दशविधस्नान, त्रिकालसंध्या, पंचायतनस्थापन, देवपूजा, ब्रह्मयज्ञ, तर्पण, शिवपार्थिवपूजा, वैश्वदेव, भोजनविधि, शयनविधि, रुद्राष्टाध्यायी, श्रावणीप्रयोग, श्रीसूक्तादि सूक्तो, ईशावास्य अथर्वशीर्षादि उपनिषदो इत्यादि अनेक विषयो आपवामां आव्या छे. जेथी अधिकारी द्विजोने नित्यकर्म करवामां बहूज उपयोगी छे. मूल्य रु० १–८–०

पंडित नारायण मूलजी.

बुकसेलर, काल्बादेवी रोड, –मुंबई नं २.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY.
Jangamwadi Math, VARANASI,
Acc. No. ....

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इति शुक्लयजुर्वेदीयरुद्राष्टाध्यायी समाप्ता ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri